International Journal of Sanskrit Research 2020; 6(5): 129-132

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 129-132
© 2020 IJSR
www.anantaajournal.com
Received: 12-06-2020
Accepted: 18-07-2020

**ड़ा. प्रदीप्त कुमार नन्द**
वरिष्ठाध्यापक:-श्रीदधिवामनजीउ-संस्कृतमहाविद्यालय: केन्द्रापड़ा ओड़िशा, भारत

**विद्वन्मणि**
वरिष्ठाध्यापक:-श्रीदधिवामनजीउ-संस्कृतमहाविद्यालय: केन्द्रापड़ा ओड़िशा, भारत

**विद्यावारिधि**
वरिष्ठाध्यापक:-श्रीदधिवामनजीउ-संस्कृतमहाविद्यालय: केन्द्रापड़ा ओड़िशा, भारत

**Corresponding Author:**
**ड़ा. प्रदीप्त कुमार नन्द**
वरिष्ठाध्यापक:-श्रीदधिवामनजीउ-संस्कृतमहाविद्यालय: केन्द्रापड़ा ओड़िशा, भारत

# चार्वाकमतसमीक्षणम्

**ड़ा. प्रदीप्त कुमार नन्द, विद्वन्मणि, विद्यावारिधि**

**शोधसार:**
भारतीयदर्शनं द्विधा विभक्तम् । आस्तिक-नास्तिकभेदात् । आस्तिकेषु न्याय-वैशेषिक-सांख्य-योग-वेदान्त-मीमांसादीनि षट् दर्शनानि प्रसिद्धानि। चार्वाक-बौद्ध-जैनानि नास्तिकदर्शनानि । कालक्रमे बोद्धेषु मतभेदो जात: । पश्चात् वैभाषिक-सौत्रान्तिक-माध्यमिक-योगाचारभेदेन बौद्धाश्चतुर्धा विभक्ता: । जैना अपि श्वेताम्बर-दिगम्बरभेदेन द्विधा विभक्ता: । भारतीयदर्शनगोष्ठीषु चार्वाकदर्शनमतीव क्षीणतया वरीवर्तते। नाप्यस्य कश्चिदाधारस्तम्भ: । चार्वाकदर्शनविषये जयराशिभट्टकृत "तत्त्वोपप्लवसिंह:" चरमोत्तमो ग्रन्थ: । अन्यथा विष्णुपुराण-महाभारत-मैत्री उपनिषत् बृहदारण्यकोपनिषत् छान्दोग्योपनिषत् सर्वसिद्धान्तसंग्रह-षड्दर्शनसमुच्चय-सर्वदर्शनसंग्रह- प्रबोधचन्द्रोदयनाटकादिषु दार्शनिकग्रन्थेषु च चार्वाकमतानि इतस्ततमुपलभ्यन्ते । अतीव क्षुद्रतया पूर्वपक्षरूपेण एतद्दर्शनं सर्वादौ प्रयुक्तम् । चार्वाके यत्तत्वं निहितं तत्तु विद्वद्धि: नादृतम् । केवलं मनोरंजनपरकं कपोलकल्पितमिति कथयितुं शक्यते । जागतिकतत्त्वचतुष्टयं चार्वाकदर्शनस्य मूलम् । संक्षेपेण देह-देहसुखव्यतिरिक्तं किमपि तत्त्वं चार्वाको न वक्ति।

**प्रस्तावना**

नास्तिकशिरोमणिना चार्वाकेण प्रोक्तमिदं दर्शनं चार्वाकनाम्ना परिचीयते । सूचीकटाहन्यायेन सर्वादौ च व्यवह्रियते । चारु-सुन्दरं लोकसम्मतं आपाततो मनोरमं वाक्-वचनं यस्यासौ चार्वाक: । पृषोदरादित्वात् साधु: [1] । पुनश्च "चर्व भोजने "इत्यस्माद् धातो: नास्ति वेदे ईश्वरे परलोके च मतिर्यस्य स चार्वाकनामा दैत्यविशेष: सुरगुरो: शिष्य: दुर्योधनस्य च मित्र [2] इति महाभारतीयवचनात् द्रढीक्रियते । अपि च "गल चर्व अदने " चर्वन्ति भक्षयन्ति तत्त्वतो न मन्यन्ते पुण्यपापादिकं परोक्षं वस्तुजातमिति चार्वाका: [3] इति चार्वाकशब्द: सिद्धहैमव्याकरणे औणादिकप्रकरणे निपातनसिद्ध: । बृहस्पतिना आगतत्वात् बृहस्पतेरिदम् वा बार्हस्पत्यमिति [4] कोषकारा समामनन्ति । जनमनोरञ्जकवचनपल्लवितेन सर्वत्र संसारक्षेत्रेषु विस्तृतम् यद्वा लोकेषु आयतं विस्तृतम्, लोलायतं तन्मतं, अनायाससाध्यत्वात् । स्वारसिकप्रवृत्त्यनुमोदकस्यास्य लोकायतमितिसंज्ञा [5] जाता । "लोके निर्विचारा: सामान्यलोकास्तद्वदाचरन्ति स्मेति लोकायता लोकायतिका [6] " गुणरत्नमतेन [7] सर्वसाधारणवाद एव लोकायतो वस्तुवादत्वेन [8] परिचित: । ऐहिकसुखप्राधान्येन परलोकाभाव [9] एव लोकायत: इत्यपि वदन्ति । पक्षान्तरे जनैराद्रियमाणं लोकायतिकमिति दुरुहं सप्रत्यक्षं सप्रमाणं सत्यमिति अन्ये विशदयन्ति । तेषां दृढोक्तिरियं विचारणीया। इयं परस्य योषा, इदं परस्य वसु, अमुं भेदं वयं न पश्याम: । परहिंसायां परस्त्रीगमनेऽपि न कोऽस्ति दोष: । सुखसाधने पुण्यापापादिविचाररहितात् । यच्चोक्तं प्रबोधचन्द्रोदये-

तुल्यत्वे वपुषां मुखाद्यवयवैर्वर्णक्रम: कीदृशो
योषेयं वसु चापरस्य तदमुं भेदं न विद्मो वयम् ।
हिंसायामथवा यथेष्टगमने स्त्रीणां परस्वग्रहे

कार्याकार्यविचारणा हि यदमी नि:पौरुषा: कुर्वते ।। (श्लो० १८) इति। वस्तुत: कोयं बृहस्पति: य: सूत्रकर्ता एव । ऋग्वेदे द्वयोर्बृहस्पत्योर्नाम श्रूयते । एक अंगिरावंशसम्भूत अपरो लोकवंशसम्भूत इति । तैत्तरीयसंहितायां देवानां पुरोहितो बृहस्पति एव । मैत्री-उपनिषदि [10] अपि बृहस्पतेर्नाम श्रूयते य: खलु असुराणां पतनसकाशात् तान् वैदिकमार्गात् प्रत्यावर्तयितुं वा पाषण्डशास्त्राभिधमिदं दर्शनं प्रणिनाय । छान्दोग्योपनिषदि च एतद्विषये किमपि तथ्यं लभ्यते।

विषयसंक्षेप:-अथ चार्वाकतत्त्वं व्याख्यास्याम: । पृथिव्यापस्तेजोवायुरिति तत्त्वानि तत्समुदाये शरीरेन्द्रियविषयसंज्ञा, न अन्यार्थत्वादिति जयराशिभट्टोक्ते: । संप्रति लोकायतिकपक्षं विचारयाम: । तत्र पृथिव्यप्तेजोवायुरूपाणि भूतचतुष्टयानि प्रसिद्धानि तत्त्वानि । अतिरिक्तानि कानि न विद्यन्ते । तत्र चैतन्यं जागतिकवस्तूनि भौतिकसमूहानि । यदुक्तं सर्वसिद्धान्तसंग्रहे लोकायतिकपक्षप्रकरणे-

लोकायतिकपक्षे तु तत्त्वं भूतचतुष्टयम् ।

पृथिव्यापस्तथा तेजो वायुरित्येव नापरम् ।। (श्लो-१) एतानि चत्वारि भूतानि प्रमेयपरकानीति चार्वाका: भाषन्ते । प्रमाणं चात्र प्रत्यक्षमेवैकं नानुमानादीनि । अनुमानस्य न प्रामाण्यं सहचारग्रहस्याविनाभावस्य दुर्बोधत्वात्, तदप्रामाण्ये च शब्दादिप्रामाण्यं व्यवस्थापयितुमशक्यमिति केवलं प्रत्यक्षमात्रप्रामाण्यमुपदिशन्ति चार्वाका: [11] । यच्चोक्तं हरिभद्रसूरिणा षड्दर्शनसमुच्चये-

पृथ्वी जलं तथा तेजो वायुर्भूतचतुष्टयम् ।

आधारो भूमिरेतेषां मानं त्वक्षजमेव हि ।। (का०-८३) इति । आकाशस्य न तत्त्वान्तरत्वं तस्याप्रत्यक्षतयाऽलीकत्वात् । चार्वाकाणां तु इयं सृष्टिप्रक्रिया । चत्वारि भूतानि परस्परं मिलित्वा जगदुत्पादयन्ति । किण्वादिभ्यो मदशक्तिवत् अर्थात् यव-गोधुम-तण्डुलादि सुराबीजेभ्य: विकृतावस्थायां यथा मद्यशक्तिरुत्पद्यते तथैव क्षित्यादिभूतचतुष्टयस्य संमिश्रणेन संयोगेन च चैतन्योत्पत्तिर्जायते । चैतन्यं देह: । स एवात्मा । तदतिरिक्तस्यात्मनोऽदर्शनात् । चैतन्यसंयोगेन एव स्थूलोऽहं कृशोऽहमिति व्यवहार: दृश्यते । यदुक्तमाचार्यै:-

स्थूलोऽहं तरुणो वृद्धो युवेत्यादिविशेषणै: ।

विशिष्टो देह एवात्मा न ततोऽन्यो विलक्षण: [12] ।। इति । भूतनाशात् देहनाश: । देहनाशात् न किमपि अवशिष्यते । तदाहु:-"विज्ञानघन एवैतेभ्यो भूतेभ्य: समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति" [13] इत्यत्र देहातिरिक्त आत्मनि अभाव: प्रदर्शित: प्रमाणाभावात् । शरीरनाशादपि पुनरुत्पतिरदर्शनात् । अपरे केचन काणोऽहं बधिरोऽहमित्याद्यनुभवात् इन्द्रियमात्मेति वदन्ति । आत्मा प्राणमय इति युक्त्या प्राणा आत्मेति निगदन्ति । अन्ये आत्मा मनोमय: इति मन आत्मेति कथयन्ति । आत्मा विज्ञानमय: इति बुद्धिरात्मेति समुद्घोषयन्ति [14] । एतेषां पाषण्डानां मतानि भौतिकवादविषयेऽपि गीतायां स्पष्टमुक्तं भगवता श्रीकृष्णेन-

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरश: प्रोक्त आसुरं पार्थ मे शृणु ।।
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा: ।

न शौचं नापि चाचारो न सत्यं तेषु विद्यते ।। (१६/६-७) इति । चार्वाकाणां कृते धर्माधर्मौ पुण्यपापे च न स्त: । नापि पुण्यपापयो: धर्माधर्मयो: वा फलं स्वर्गनरकादिकं विद्यते । स्वभावादेव सर्वं जायते । तथाहि समुच्चये-

लोकायता वदन्त्येव नास्ति जीवो न निवृति: ।
धर्माधर्मौ न विद्येते न फलं पुण्यपापयो: [5] ।।

अपि चात्र-

तस्माद्दृष्टपरित्यागाद्यददृष्टे प्रवर्तनम् ।
लोकस्य तद् विमूढत्वं चार्वाका: प्रतिपेदिरे [16] ।।
अपि च सर्वसिद्धान्तसंग्रहे शंकरेण-

न कल्पौ सुखदु:खाभ्यां धर्माधर्मौ परैरिह ।

स्वभावेन सुखी दु:खी जनोन्यन्नैव कारणम् [17] ।। इति स्वभावेन हि सर्वं जायते । नास्य कोऽपि कर्ता विद्यतेऽत्र अदृष्ट:। रजोबीर्जजनितस्वभाव एव जीवसृष्टेर्मूलकारणम् । प्रतिशरीरेषु प्रवृत्तिभिन्नत्वात् प्रतिजीवेषु भिन्नप्रतीतिर्भवति । स्वभावानुकूलव्यापारत्वात् । तथाहि सिद्धान्तसारे-

शिखिनश्चित्रयेत्को वा कोकिलान् क: प्रकूजयेत् ।

स्वभावव्यतिरेकेण विद्यते नात्र कारणम् [18] ।। अनेन स्वभाववाद: सिद्ध: । इहलोक: चाक्षुष: । कुत्रापि परलोक: स्वर्गो वा नास्ति, नरकश्च नास्ति । मूर्खा: वैकुण्ठ-कैलास-मृत्युलोकादिकं समुपदिश्य जनान् व्यामोहयन्ति । तेषां कथनं शशशृंगवत्मिथ्या । ऐश्वर्यादयो गुणा: स्वभावादेव जायन्ते । रोगादयोऽपि भुक्तान्नपरिपाकवशाद् भवन्ति । रोगनिवृत्तिस्तु स्वभावादेव कदाचिद् भवति न वेति । काकतालीयन्यायेन मूढा: जायमानं कार्यं विलोक्य कार्यकारणभावं मन्यन्ते । यच्चोक्तं सिद्धान्ते –

इह लोकात्परो नान्य: स्वर्गोऽस्ति नरको न च ।
शिवलोकादयो मूढै: कल्प्यन्तेऽन्यै: प्रतारकै: [19] ।।
अपि च सर्वदर्शनसंग्रहे बार्हस्पत्यसूत्रम्-
न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिक: ।

नैव वर्णाश्रमादीनां क्रियाश्च फलदायिका ।। इति सुस्पष्ट: । जीवस्य गमनागमनादिकं मृषा । वर्णाश्रमोचितं कार्यजातमलिकम् । प्रत्यक्षाभावात् । वेदा: निर्मूला: । धर्मशास्त्राणि पुराणादीनि भ्रमात्मकानि । नापि अपौरुषेयो वेद: । एतेषामपि छद्मवेशिन: कर्तारो वर्तन्ते । यदुक्तं संग्रहे-

त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचरा: ।
जर्भरी तुर्फरीत्यादि पण्डितानां वच: स्मृतम् [20] ।। इति ।

वेदोक्त-कर्मकाण्डादिप्रोक्तानि श्राद्ध-तर्पण-यागयज्ञादीनि कर्माण्यपि निर्मूलानि । उदरपरिपोषणकराणि जीविकानिर्वाहककार्याणि भवन्ति, नान्यथा । तेषु तेषु धूर्ता: हि मज्जन्ते । तथाहि संग्रहे-

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पति: ।।
पशुश्चेन्निहत: स्वर्गं ज्योतिष्टोमे गमिष्यति ।
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते ।।
मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेह: संवर्धयेत् शिखाम् [21] ।। इति । स्पष्ठम्

अपि च प्रबोधचन्द्रोदये द्वितीयांके-

स्वर्गकर्तृक्रियाद्रव्यविनाशे यदि यज्वनाम् ।

ततो दावाग्निदग्धानां फलं स्याद्भूरि भूरुहाम् [22] ।। इति चार्वाकयुक्तिर्बलीयसी । अत्र न कोऽपि फलदातृत्वेन ईश्वरो विद्यते । प्रत्यक्षाभावात् । सुखदु:खादिकं कर्मानुसारं स्वभावसम्भूतम् । अर्थबली बाहुबली राजा एव परमेश्वर: । नैयायिकादीनामनुमानगम्यो वेदान्तिनां च श्रुतिगम्य ईश्वर: सर्वादौ वर्जित: । मरणमेव मोक्ष: । मरणात्म्परं हि दु:खनिवृत्तिर्जायते । अपिच संग्रहे-

अंग़नालिंगनाजन्यसुखमेव पुमर्थता ।

कण्टकादिव्यथाजन्यं दु:खं निरय उच्यते [23] ।। इति । विषयवासनाऽत्र बलीयसी प्रवृत्ति:। भोगे हि सुखम् परमपुरुषार्थ: । रोगे दु:खे अर्थाभावे च नर्कगति: महाकष्ट: । भोगायतनं शरीरम् । शरीरसुखसाधनहेतुरवश्यमेव ग्रहणीय: । कामिनी-काञ्चनेषु भोग्यपदार्थेषु अनुष्ठानमवश्यमेव पालनीयम् । नायक-नायिकयो: मनोहरं गाढालिंगनं क्व, क्व भिक्षाटनम् । उपवासनियमा:, कृछ्रचान्द्रायणादय: व्रतानि, पञ्चाग्नितपांसि, इत्यादीनि न कामिनीभोग समकक्षानि । किन्तु अयथा शरीरकष्टकराणीति परिगणितानि चार्वाकनये । जागतिकसुखस्य पराकाष्ठानिष्पादनमेव अस्य दर्शनस्य मूलोद्देश्यम् । यच्चोक्तं प्रबोधचन्द्रोदये-

कालिंग़नं भुजनिपिड़ितबाहुमूलं
भुग्नोन्नतस्तनमनोहरमायताख्या: ।
भिक्षोपवासनियमार्कमरीचिदाहै:
देहोपशोषणविधि: कुधियां क्व चैष: [24] ।।

अपि च तत्र-

त्याज्यं सुखं विषयसंगमजन्मपुंसां
दु:खोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहिन् जिहासति सितोत्तमतण्डुलाढ्यान्

को नाम भोस्तुषकणो परितान् हितार्थी [25] ।। इत्यत्र विषयभोगस्य सर्वपुरुषार्थत्वेन निश्चित: । दु:खमिश्रितं यत्संसारसुखं तत्हेयमिति दुर्विषयम् । न तत्र कापि सत्यता प्रत्यक्षसिद्धा । मूर्खविचारणा सर्वदा च त्याज्या । खाद्यप्रयोजनार्थी न तुषकणयुक्तान् तण्डुणान् जिहासति । यदि वा त्यक्ष्यति खाद्याभावात्मरिष्यति न वा । विवेकिनां नये मत्स्ये कण्टकामिषयोर्विद्यमानत्वेऽपि तस्यापरित्याज्यत्ववत् दु:खमिश्रितेऽपि सांसारिकसुखे सुखस्याड्गीकारात् । येन केनोपायेनार्थोपार्जनं श्रेयस्करम् । पुण्यपापाभावात् [26] । तथाहि संग्रहे माधवाचार्येण–

यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत् ।

भस्मीभूतस्य देहस्य पुनरागमनं कुत: ।। (१) इति जीवितावस्थायां सर्वसुखभोग एव सत्यम् । अन्यथा अनवस्थाप्रसंगात् । भौतिकवादिनां मतानि दिङ्मात्र प्रदर्शितानि । चार्वाकेण स्वप्रक्रियां प्रदर्श्य परमतान्यपि खण्डितम् । एतत्सर्वं जयराशिभट्टविरचिते "तत्त्वोपप्लवसिंहा"ख्ये ग्रन्थे समुपलभ्यते । तत्र सयुक्तिभि: न्यायसंम्मतप्रत्यक्षलक्षणपरीक्षाप्रकरणे जाते: निराकरणं, समवायनिरसनम्, अव्यभिपदस्यापाकरणं,व्यवसायात्मकपदस्य समालोचनम्, अर्थस्यापि प्रत्यक्षजनकत्वखण्ड़नम्, अनुमानखण्डनम्, आत्मानुमानखण्ड़नादीनि संपादितानि। मीमांसाचोदितस्य गोत्वादिप्रतिपादकत्वेन गोशब्दादीनामप्रमाण्यं प्रदर्शनं, प्रत्यभिज्ञानप्रमाणखण्ड़नं, प्रत्यक्षखण्ड़नादिकं च बहु प्रदर्शितम् । बौद्धानामविसंवादिज्ञानलक्षणनिरास:,ज्ञानस्य विषयाकारत्वखण्ड़नं, अपि च मानमेयसंख्याया निरसनं संपादितम् । सांख्यसम्मत प्रत्यक्षलक्षणमपि खण्ड़ितम्। प्रत्यक्षं विहाय अनुमान-उपमान-शब्द-अर्थापत्ति-अभाव-सम्भव-ऐतिहादीनि सर्वप्रमाणानि खण्ड़ितानि दृश्यन्ते तत्र। प्रकृतपक्षे पाषण्ड़स्य चार्वाकस्य मतं तु सर्वदा हेयम् । न तत्र मति: स्थापनीया । दुष्टतर्कावलम्बिनानां कृते का वार्ता जनसुखदायिनी । यतो हि रामायणे तिरस्कारप्रसंगे-

कश्चिन्न लोकायतिकान् ब्राह्मणांस्तात सेवते ।
अनर्थकुशला ह्येते बाला: पण्ड़ितमानिन: ।।

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधा: ।

बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते [27] ।। इति चार्वाकवचनं सम्यक् प्रतिभाति । सर्वेषु दर्शनग्रन्थेषु चार्वाकमतं प्रस्तुयते । शाणितयुक्तिभि: चार्वाका: स्वमतमुपस्थापयन्ति परमतं खण्ड़यन्ति च । कलियुगस्य कृते कापि विशेषवार्तां प्रस्थापयन्तीति मन्ये । शम् ।

**पादटीप्पण्य:**

1. वाचस्पत्यं, शब्दकल्पद्रुमे च
2. महा०भा०शा०प०-६४/३८-३९
3. हैमव्याकरणे
4. श०क०द्रुमे
5. प्रबोधचन्द्रोदये
6. शा०भा०-१/१/१
7. तर्करहस्यदीपिकायाम्
8. दासगुप्त: (आंग्ल)
9. राधाकृष्णन्(आंग्ल)
10. मैत्री०उ०-७/१०
11. षड्दर्शनसमुच्चय:
12. सर्वसिद्धान्तसंग्रह:
13. बृ०उ०-२/४/१२
14. वेदान्तसार:
15. ष०द०समु-८०
16. तत्र-८५
17. स०सि०सं-४
18. तत्र-५
19. तत्र-८
20. सर्वदर्शनसंग्रह:
21. तत्र-२,३,४
22. प्र०च०-१९
23. स०द०सं-१
24. प्र०च०द०-२२
25. तत्र-२३
26. सर्वदर्शनकौमुदी
27. रामा०ा०का०-१००/३८

**सहायकग्रन्था:**

१-श्रीमद्भगवद्गीता
२-रामायणम्
३-श्रीमन्महाभारतम्
४-बृहदारण्यकोपनिषत्
५-मैत्री उपनिषत्
६-वाचस्पत्यम्
७-शब्दकल्पद्रुम:
८-प्रबोधचन्द्रोदयनाटकम्
९-शारीरकभाष्यम्
१०-तर्करहस्यदीपिका
११-षड्दर्शनसमुच्चय:
१२-सर्वसिद्धान्तसंग्रह:

१३-वेदान्तसार:
१४-सर्वदर्शनसंग्रह:
१५-सर्वदर्शनकौमुदी
१६-सामान्यदर्शनम्
१७-तत्त्वोपप्लवसिंह:
१८-लोकायतदर्शन (वंगीय)
१९-भारतीयदर्शनम् (वंगीय)
२०-दर्शनशास्त्रस्येतिहास: